अजन्तानां तावत् – चायिष्यते, चेष्यते । अचायिष्यत, अचेष्यत । दायिष्यते, दास्यते । अदायिष्यत, अदास्यत । शामिष्यते, शमिष्यते, शमयिष्यते । अशामिष्यत, अशमिष्यत, अशमयिष्यत । हन् – घानिष्यते, हनिष्यते । अघानिष्यत, अहनिष्यत । ग्रह् – ग्राहिष्यते, ग्रहीष्यते । अग्राहिष्यत, अग्रहीष्यत । 'ग्रहोऽलिटि दीर्घः' (७.२.३७/२५६२) इति प्रकृतस्य इटो दीर्घत्वम् । दृश् – दर्शिष्यते, द्रक्ष्यते । अदर्शिष्यत, अद्रक्ष्यत ।

सिचि अजन्तानाम् – अचायिषाताम्, अचेषाताम् । अदायिषाताम्, अदिषाताम् । अशामिषाताम्, अशमिषाताम्, अशमयिषाताम् । हन् – अघानिषाताम्, अवधिषाताम्, अहसाताम् । ग्रह् – अग्राहिषाताम्, अग्रहीषाताम् । दृश् – अदर्शिषाताम्, अदृक्षाताम् ।

[1]सीयुटि अजन्तानाम् – चायिषीष्ट, चेषीष्ट । दायिषीष्ट, दासीष्ट । शामिषीष्ट, शमिषीष्ट, [2]शमयिषीष्ट । हन् – घानिषीष्ट, वधिषीष्ट । ग्रह् – ग्राहिषीष्ट, ग्रहीषीष्ट । दृश् – दर्शिषीष्ट, दृक्षीष्ट ।

तासावजन्तानाम्[3] – चायिता, चेता । दायिता, दाता । शामिता, शमिता, [4]शमयिता । हन् – घानिता, हन्ता । ग्रह् – ग्राहिता, ग्रहीता । दृश् – दर्शिता, द्रष्टा ।

स्यसिच्सीयुट्तासिषु इति किम् ? चेतव्यम् । दातव्यम् । भावकर्मणोः इति किम् ? चेष्यति । दास्यति । उपदेशे इति किम् ? कारिष्यते [5]इति गुणे कृते रपरत्वे च न प्राप्नोति, उपदेशग्रहणाद् भवति । अज्झनग्रहदृशाम् इति किम् ? पठिष्यते[6] । [7]अङ्गाधिकारविहितं कार्यमिहातिदिश्यते, तेन हनिणिङा[8]मादेशा न भवन्ति[9] । हनिष्यते, घानिष्यते । एष्यते, आयिष्यते । अध्येष्यते, अध्यायिष्यते । 'हनो वध लिङि' (२.४.४२/२४३३), 'लुङि च' (२.४.४३/२४३४), 'इणो गा लुङि' (२.४.४५/२४५८), 'विभाषा लुङ्लृङोः' (२.४.५०/२४६०) इत्येते विधयो न भवन्ति ॥

## दीङो युडचि क्ङिति । (६३/२८०७)

दीङो युडागमो भवति अजादौ क्ङिति प्रत्यये परतः । [10]उपदिदीये, उपदिदीयाते, उपदिदीयिरे । दीङः इति पञ्चमीनिर्देशाद् [11]अजादेर्युडागमो भवति । विधानसामर्थ्याच्च 'एरनेकाचोऽसंयोगपूर्वस्य' (६.४.८२/२७२) इति यणादेशे कर्तव्ये तस्यासिद्धत्वं न भवति । अचि इति किम् ? उपदेदीयते । क्ङिति इति किम् ? [12]उपदानम् ॥

## आतो लोप इटि च । (६४/२३७२)

इटचजादावार्धधातुके क्ङिति च आकारान्तस्य अङ्गस्य लोपो भवति । [13]इटि – पपिथ । तस्थिथ । [14]किति – पपतुः । पपुः । तस्थतुः । तस्थुः । गोदः । कम्बलदः । ङिति – प्रदा । प्रधा । आर्धधातुके इत्येव, यान्ति । वान्ति । व्यत्यरे । व्यत्यले । रातेर्लतिश्च लङि इटि रूपम् । अचि इत्येव, ग्लायते । दासीय ॥

1. सीयुट् क. 2. शमयिषीष्ट नास्ति क. ह. 3. च इत्यधिकम् क. 4. शमयिता नास्ति क. ह.
5. इत्यत्र फ. क. 6. वदिष्यति इत्यधिकम् ह. 7. अङ्गाधिकारकार्यम् क. 8. आदेशो न भवति ब. क.
9. इति इत्यधिकम् फ. 10. उपदिदीये – भवति नास्ति क. 11. अजादेः एव ह. 12. उपादानम् क. ड.
13. इटि – वान्ति नास्ति क. 14. क्ङित्यपि ह.